विद्या भवन बालिका विद्यापीठ विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग दशम् विषय संस्कृत विषय श्यामउदय सिंह

ता:25-01-2020( एन. सी.ई.आर.टी.पर आधारित)

पाठ:षष्ठ: पाठनाम सुभाषितानि (बोर्ड बेस्ड क्वेश्चन)

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**
    i. केन समः बन्धुः नास्ति?
    ii. वसन्तस्य गुणं कः जानाति?
    iii. बुद्धयः कीदृश्यः भवन्ति?
    iv. नराणां प्रथमः शत्रुः कः?
    v. सुधियः सख्यं केन सह भवति?
    vi. अस्माभिः कीदृशः वृक्षः सेवितव्यः?

**उत्तराणि-**

vii. उद्यमेन समः बन्धुः नास्ति।
viii. पिकः वसन्तस्य गुणं जानाति।
ix. परेङ्गितज्ञानफलाः बुद्धयः भवन्ति।
x. नराणां प्रथमः शत्रुः क्रोधः।
xi. सुधियः सख्यं सुधीभिः सह भवति।
xii. अस्माभिः फलच्छायासमन्वितः वृक्षः सेवितव्यः।

2. **अधोलिखिते अन्वयद्वये रिक्तस्थानपूर्तिं कुरुत-**
    i. यः __________ उद्दिश्य प्रकुप्यति तस्य ___________ स ध्रुवं प्रसीदति। यस्य मनः अकारणद्वेषि अस्ति, __________ तं कथं परितोषयिष्यति?
    ii. __________ संसारे खलु ___________ निरर्थकम् नास्ति। अश्वः चेत् ___________ वीरः खरः ___________ वहनं (वीरः) (भवति)।

**उत्तराणि-**

iii. यः **निमित्तम्** उद्दिश्य प्रकुप्यति तस्या **अपगमे** स ध्रुवं प्रसीदति। यस्य मनः अकारणद्वेषि अस्ति, **जनः** तं कथं परितोषयिष्यति?
iv. **विचित्रे** संसारे खलु **किञ्चित्** निरर्थकम् नास्ति। अश्वः चेत् **धावने** वीरः खरः **भारस्य वहने** (वीरः) भवति।

3. **अधोलिखितानां वाक्यनां कृते समानार्थकान् श्लोकांशान् पाठात् चित्वा लिखत-**
    i. विद्वान् स एवं भवति यः अनुक्तम् अपि तथ्यं जानाति।
    ii. मनुष्यः समस्वभावैः जनैः सह मित्रतां करोति।
    iii. परिश्रमं कुर्वाणः नरः कदापि दुःखं न प्राप्नोति।
    iv. महान्तः जनाः सर्वदैव समप्रकृतयः भवन्ति।

**उत्तराणि-**

v. अनुक्तमप्यूहति पण्डितो जनः।
vi. समान-शीलः-व्यसनेषु सख्यम्।
vii. नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।
viii. सम्पत्तौ च विपत्तौ च महतामेकरूपता।

4. **यशानिर्देशं परिवर्तनं विधाय वाक्यानि रचयत-**

i. गुणी गुणं जानाति। (बहुवचने)
ii. पशुः उदीरितं अर्थ गृह्णाति। (कर्मवाच्ये)
iii. मृगाः मृगैः सह अनुव्रजन्ति। (एकवचने)
iv. कः छायां निवारयति। (कर्मवाच्ये)
v. तेन एव वह्निना शरीरे दह्यते। (कर्तृवाच्ये)

**उत्तराणि-**

vi. गुणिनः गुणान्/गुणानि जानन्ति।
vii. पशुना उदीरितः अर्थः गृहयते।
viii. मृगः मृगेण सह अनुव्रजति।
ix. केन छाया निर्वायते।
x. सः एव वह्नि शरीरं दहति।